## ॥*॥ सिद्धे शब्दार्थसम्बन्धे ॥*॥

सिद्धे शब्देऽर्थे सम्बन्धे चेति ॥

शब्दश्च अर्थश्च सम्बन्धश्च - शब्दार्थसम्बन्धम्, तस्मिन् शब्दार्थसम्बन्धे। (समाहारद्वन्द्वः)। अत्र सम्बन्धस्तु शब्दार्थयोरेव। त्रयाणामपि आत्यन्तिकाऽविश्लेषप्रदर्शनाय समाहारद्वन्द्वः प्रदर्शितः।

=> सिद्धः = नित्यः (जातिस्फोटलक्षणः शब्दः, व्यक्तिस्फोटलक्षणो शब्दः वा नित्यः इत्यर्थः)

शब्दः => कार्यशब्दिकः = येषां मते शब्दः अनित्यः वर्तते ~~(शब्दस्य आन~~ (शब्दस्य कार्यत्वमङ्गीकुर्वन्ति) तेषां मतेऽपि शब्दस्य प्रवाहनित्यता = = अनादिव्यवहारानित्यता नु अङ्गीक्रियते एव।

अर्थः => अर्थस्य अपि जातिपक्षे - अर्थः = घटत्वं, पटत्वम् इत्यादीनामपि नित्यत्वं वर्तते

=> अर्थस्य द्रव्यपक्षे (व्यक्तिपक्षे) - सर्वशब्दानां (घटपटादिशब्दानां) असत्योपाध्यवच्छिन्नं = घटत्वाद्युपाध्यवच्छिन्न घटादिरूपम् यत् तदवच्छिन्नं ब्रह्मतत्त्वम् (द्रव्यम्) तस्मात् व्यक्तिपक्षेऽपि अर्थस्य नित्यत्वम्। अथवा प्रवाहनित्यता वा।

सम्बन्धः => सम्बन्धस्य व्यवहारपरम्परया अनादित्वात् नित्यत्वमेव।

तस्मात् शब्दोऽपि नित्यः, अर्थोऽपि नित्यः तयोः सम्बन्धश्च नित्यः इत्यर्थः॥

सिद्धशब्दः नित्यपर्यायो अनित्यपर्यायो च, तस्मात् पृच्छ्यते - अथ सिद्धशब्दस्य कः पदार्थः? ______ आकाशमिति ॥

=> सिद्धशब्दः अत्र नित्यपर्यायेण वाचकः। यथा सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति कूटस्थेषु (~~विकाररहितेषु~~) (अविनाशिषु) अविचालिषु (विकाररहितेषु) पदार्थेषु नित्यार्थे सिद्धशब्दः प्रयुज्यते तद्वदत्रापि सिद्धशब्दः नित्यपर्यायः।

Scanned by CamScanner

ननु च भोः कार्येष्वपि ---- -------- सिद्धशब्दस्तस्ये'ति?
मनु सिद्धः ओदनः, सिद्धः सूपः इत्यादि अनित्येष्वपि पदार्थेषु सिद्धशब्दः प्रयुज्यते। तस्मात् अनित्यार्थेऽपि विद्यमानत्वात् सिद्धशब्दः नित्यार्थे एव प्रयुक्तः न तु अनित्यार्थे इति कथं वा वक्तुं शक्यते?

सङ्ग्रहे तावत्कार्यप्रतिद्वन्द्विभावान ---------------- इहापि तदेव॥
सङ्ग्रहे = व्याडीकृतलक्षणग्रन्थः। तत्रापि कार्य (अनित्य) प्रतिद्वन्द्वि शब्द सिद्धशब्दः, तस्मात् यथा तत्र नित्यपर्यायवाचित्वेन सिद्धशब्दस्य ग्रहणं तद्वदत्रापि। नित्यार्थे एव सिद्धशब्दः प्रयुक्तः॥

अथवा सन्त्येकपदान्यप्यवधारणानि ----------- न साध्य इति॥

* द्विपदावधारणम् = यदा अवधारणार्थे द्योतनार्थं 'एव' इति अव्यय प्रयोगः क्रियते तद् द्विपदावधारणम्। यथा - 'रामः एव गच्छति' इति॥

* एकपदावधारणम् - एकमसहायं पदमवधारणं यस्य तद् एकपदमवधारणं यथा 'राम गच्छति' इति॥

एवमेव 'अब्भक्षो', 'वायु भक्ष' इति। अत्र सर्व एव आपः भक्षयन्ति इति अब्भक्षस्तुतिः। अत्र एकपदावधारण-सामर्थ्येन (लिङ्गेन) अवगम्यते यत् आप एव भक्षयति इति।
एवमेव अत्रापि नित्यानित्यौ विहाय: अन्यद् नास्ति तस्मात् 'सिद्धः एव' इत्यवगम्यते न तु साध्यः।
अनित्यानां पदार्थानां तु प्रागभावः प्रध्वंसाभावश्च वर्तते तस्मात् ते न सिद्धाः, अतः कारणात् सिद्ध शब्देन नित्यपदार्थः एव अवगन्तव्यः॥

* अथवा - पूर्वपदलोपोऽत्र द्रष्टव्यः ------ --- सत्यभामा भामेति।
अथवा पूर्वपदलोपसमासः अत्र अवगन्तव्यः यथा सत्यभामायाः

प्रदीप:)
(?)?

स्थाने 'भामा' इति, देवदत्तस्य स्थाने 'दत्त:' इति उच्चार्यते एवमेव अत्रापि 'अत्यन्तसिद्ध:' स्थाने सिद्ध: मात्र उच्चारितम्।

=) अत्यन्तं = त्रिकालापरिच्छेन सिद्धम् ( यद् सर्वेष्वपि कालेषु सिद्धं वर्तते न तु साध्यम् )

* अथवा "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्" इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्याम:॥

अथवा 'व्याख्यानतो विशेष०' इति परिभाषाऽनुसारं, सिद्ध शब्द: नित्य-पर्यायवाची इति स्वीकुर्म: इति व्याख्यास्याम:।

न्यायाद्वा = परिभाषया वा॥ सन्देह मात्रेण अलक्षणता न भवति प्रमाणान्तरेण तस्य निश्चय: कर्तव्य:॥

किं पुनरनेन ________________ सन्देह: स्यात्?

तर्हि किमर्थं व्याख्यानार्थं तावान् प्रयत्न: कृत:, साक्षात् सिद्ध-शब्दस्य स्थाने नित्यशब्द: एव पठितुं शक्यते स्म। येन सन्देह: एव न स्यात्।

## ॥*॥ मङ्गलार्थम् ॥*॥

माङ्गलिक आचार्यो ________________ यथा स्युरिति॥

मङ्गलार्थ: सिद्धशब्द: इत्यर्थ:।

माङ्गलिक: = अगर्हिताभीष्टार्थसिद्धि: मङ्गलं, तत्प्रयोजनवान् आचार्य: माङ्गलिक:। महान् शास्त्रसमूहस्य मङ्गलार्थं सिद्धशब्द: प्रयुक्त:।

शास्त्रसमूह: = (वार्त्तिकपाठ:)

येषां शास्त्राणां आदौ मङ्गलं पठ्यते तानि शास्त्राणि अविच्छेदात् वर्धन्ते (प्रथन्ते), वीरपुरुषाणि (श्रोतृणां परै: पराजयो न भवति।) च भवन्ति, आयुष्मत्पुरुषाणि - शास्त्रानुष्ठाने धर्मोपचयात् आयुर्वर्धनं च भविष्यति तथा ~~अध्येतृ~~ ~~अध्येतृणां~~ अध्येतार: सिद्धार्था: = निर्वृत्ति: (निष्पत्ति:) एव तेषां सिद्धि: भवति॥

अयं खलु नित्यशब्दो - - - - - - - - - - - - - - - - - न नित्यशब्दः॥

ननु नित्यशब्दः केवलं कूटस्थेऽविचालिष्वर्थेषु भावेषु ~~मात्र~~ न वर्तते अपि आभीक्ष्ण्येऽर्थेऽपि (पौनःपुन्यार्थे) अपि प्रयुज्यते। यथा नित्यप्रहसितः, नित्यजल्पितः इत्यादि।

सर्वदाऽपि आभीक्ष्ण्ये प्रयुक्तः नित्यशब्दः क्रियापदमाकाङ्क्षते। क्रियापदाभावे केवलं 'सिद्धे शब्दार्थसम्बन्धे' इति शब्दस्यार्थः एवं स्यात् - येषां शब्दानां प्रयोगः आधिकः वर्तते तेषां एव व्याख्यानं कुर्मः न तु अल्पप्रयुक्तानां शब्दानां, ~~यदि~~

~~यद्येवं~~ एवं शङ्काऽपि न युक्ता यतो हि क्रियापदाऽभावेऽपि नित्यशब्द दृश्यते यथा 'नित्यवीप्स्य' 'नित्यवीप्सयोः', 'आद्यचर्यमानित्ये' इति।

अस्तु नाम यद्यपि नित्यशब्दः आभीक्ष्ण्यार्थकः इति शंका क्रियते ~~चेदपि~~ तर्हि तत्र 'व्याख्यानतो विशेष प्रतिपत्तिः' इति ~~स्र~~ न्यायेन समाधानं शक्यं, पुनश्च आचार्य(वार्तिककारः) मङ्गलार्थमेव तदादौ पठति तस्मात् सिद्धशब्दः एव उपात्तः न तु नित्यशब्दः॥

पदार्थनिर्णयाधिकरणम् -

अथ कं पुनः पदार्थं - - - - - - - - - - - - - - - अभिसम्बन्धः॥

पदं - वाचकम्, पदार्थः - वाच्यः। कं पदार्थं (पदस्य वाच्यः) मत्वा एषः 'सिद्धे शब्दार्थसम्बन्धे' इति विग्रहः कृतः?

आकृतिं वा व्यक्तिं वा इति प्रष्टुराशयः। आकृतिरेव पदार्थः (पदस्यवाच्यः) तस्य नित्यत्वात्, द्रव्यन्तु अनित्यमेव।

तस्मात् "सिद्धे शब्दे अर्थसम्बन्धे चेति" विग्रहः शब्दः नित्यः तथा अर्थवता (शब्देन) सह अर्थस्य सम्बन्धोऽपि नित्यः इत्यर्थः।

प्र० - अत्र अर्थशब्दः सम्बन्धस्य विशेषणम्। ननु शब्दः नित्यः, घटपटादि अर्थाः आनित्याः तर्हि कथं तयोर्मध्ये विद्यमानः सम्बन्धः नित्यः स्यात्?

योग्यतालक्षणत्वात् सम्बन्धस्य - योग्यता = बोधजनकत्वयोग्यता, तादात्म्यम् (भेदसहिष्णुरभेदः), ~~सम्बन्धे~~ शब्देन भूतभविष्याद्यै विद्यमानानां पदार्थानां बोधजनने सामर्थ्यं वर्तते सम्बन्धस्य तस्मात् तस्य नित्यत्वम्।

पुनश्च नित्यसम्बन्धः नित्ययोः पदार्थयोरेव भवेत् इति न कोऽपि नियमः नित्यानित्ययोर्मध्येऽपि भवितुमर्हति यथा शब्दार्थौ, अवयवावयविनौ इत्यादि।

* अथवा द्रव्य एव - - - - - - - - - - - - - द्रव्यमेवाऽवशिष्यते॥

अथवा, शब्देन वाच्यं द्रव्यमेव भवतु, आकृतेः अनित्यत्वात्॥ तस्मात् 'सिद्धे शब्देऽर्थे सम्बन्धे' इत्येव विग्रहः न्याय्यः। यथा लोके मृत्तिका नित्या तद्विकाराः अनित्याः तद्वदेव द्रव्यं नित्यं तद्विकाराः (आकृतयः) अनित्याः एव। आकृतेः ~~श~~ नाशे सति द्रव्यं मात्रावशिष्यते।

=> द्रव्यशब्देन अत्र ~~श~~ असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं ग्राह्यं न तु घटपटादिकं। पुनश्च 'आत्मैवेदंसर्वम्' इत्यादि श्रुतिवचनात् ~~ब~~ ब्रह्मज्ञाने सति गोत्वादि जातिनामपि अनित्यत्वमापद्यते।

आकृति शब्देन - घटादिकं ~~तद्गत जाति~~ तद्गतजातयः घटत्वादिकं द्वयमपि गृह्यते।

* आकृतावपि पदार्थ एव - - - - - - - - - - - - द्रव्यान्तरस्था तूपलभ्यते

'सिद्धे शब्देऽर्थसम्बन्धे' इति विग्रहः आकृतिपक्षेऽपि साधुरेव। आकृति = जातिः॥ आकृतिस्तु नित्या एव एकस्य घटस्य नाशे सति ~~द्रव्यान्तरेषु तस्य (घटत्वस्य)~~ घटान्तरेषु तस्य (घटत्वस्य) उपलम्भः भवत्येव।

=> अत्र उपरति शब्दस्य अनभिव्यक्तः इत्यर्थः।

=> आकृतेः नित्यत्वं व्यावहारिकसत्तामाश्रित्य उपपाद्यमानमस्ति।

Scanned by CamScanner

* अथवा नेदमेव नित्यलक्षणम् - - - - - - - - - - - न विहन्यते ॥
परमार्थदशायां यद्यपि जातिरनित्या तथाऽपि लोके व्यवहारदशायां तस्य नित्यत्वं साधयितुमिदम् आरब्धं - अथवा इति -
ध्रुवं, कूटस्थं, अविचाली, ~~अनपाय:~~, ~~उपजन~~, अनपायोपजनविकारी, अनुत्पत्ति, ~~अवृद्धि:~~ अवृद्ध्यव्ययवयोगि इति नित्यस्य लक्षणमेव न ।
=> लक्षणान्तरं दर्शयति - तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते
तत्त्वं = तस्यभाव: । आकृतौ अपि तत्त्वं तु न नश्यति ।
* अनित्यता त्रिधा -
① संसर्गानित्यता - यथा जपाकुसुमसम्पर्केण स्फटिके भासमाना रक्तता ।
② परिणामानित्यता - यथा एकस्मिन्नेव बदरफले आर्द्रे हरितवर्ण: तथा कालान्तरे रक्तवर्ण: दृश्यते ।
③ प्रध्वंसाऽनित्यता - घटादिवस्तुनां विनाश: ।

अत्र 'ध्रुवं कूटस्थं' पदाभ्यां - संसार्गाऽनित्यता, अविचालि इत्यनेन परिणामानित्यता तथा 'अनपाय:' इत्यादीना प्रध्वंसाऽनित्यता परिहृता ।

* अथवा किं न एतेन - - - - - - - - - - - सम्बन्धश्चेति ।
शब्द: नित्यो वा भवतु अनित्यो वा भवतु किमनेन ? तथा तत्प्रतिपाद्यमान: अर्थोऽपि नित्यो वा भवतु अनित्यो वा, तत्र वैयाकरणानां तात्पर्यं नास्ति । लोकेन प्रतिपाद्यमानं एव वैयाकरणानां अभिमतं तस्मात् लोके तु शब्दार्थयो: नित्यानित्ये मतभेद: वर्तते दार्शनिकानां, तस्मात् उभयपक्षमपि आश्रित्य भाष्यकारै: व्याख्यानं क्रियते ।
=> पुनश्च यदा-यदा शब्दोच्चार्यते, बुद्धौ अर्थस्तु उपजायते एव तस्मात् प्रवाहनित्यता अङ्गीक्रियते । तस्मात् मतानुसारं व्याख्यानं क्रियते -
① सिद्धे शब्दे अर्थे सम्बन्धे च इति ।
② सिद्धे शब्दे अर्थसम्बन्धे च इति ॥

Scanned by CamScanner

कथं पुनर्ज्ञायते - - - - - - - - शब्दान्प्रयुञ्जते ॥

शब्दार्थयोः सम्बन्धः नित्यः इति कथं ज्ञायते ?, ~~लोकतः एव~~ ।

॥*॥ लोकतः ॥*॥

लोके तु जनाः अर्थविशेषम् उपादाय शब्दव्यवहारं कुर्वन्ति न तु तेषां शब्दानां (निर्वृत्तौ) निष्पत्तौ (शब्दार्थौ तथा तेषां सम्बन्धे) यत्नं कुर्वन्ति । लोके ये (कार्याः भावाः) ~~अनित्य~~ अनित्यपदार्थाः तेषां निष्पत्तौ यत्नः क्रियते ।

यथा कुलालगृहे गत्वा 'घटं कुरु कार्यमनेन करिष्यामि' इति लोकव्यवहारः दृश्यते न ~~तु~~ तथा शब्दानां विषये 'वैयाकरणानां गृहे कश्चन गच्छति, शब्दनिष्पत्त्यर्थम् ।

अपितु यथा मनसि इच्छा जायते तथा शब्दं प्रयुनक्ति ।

=> लोके नित्यानित्यविषयेषु जनानां व्यवहारः ~~त~~ ध्रियते । शब्दव्यवहारस्य अनादिकालात् वृद्धपरम्परया अनुवर्त्यमानत्वात् शब्दाः नित्याः । घटादीनां तु अर्थक्रियाकारित्वात् पुनश्च प्रागभावप्रध्वंसाभावत्वात् तेषामनित्यत्वम् ।

यदि तर्हि लोक एव प्रमाणम्, किं शास्त्रेण क्रियते ?

॥*॥ लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे (सति) शास्त्रेण धर्मनियमः ॥*॥

लोकतः अर्थविषये प्रयुक्तानां शब्दानां व्यवहारे सति शास्त्रद्वारा धर्मनियमः क्रियते ।

=> अत्र वार्तिकस्य ~~त्रिधा विभागः कर्तुं शक्यः~~ एकवाक्यता क्रियते ।

① सिद्धे शब्दार्थसम्बन्धे शास्त्रं प्रवृत्तं तत्कथं ज्ञायते ? इति प्रश्ने - "लोकतः"

② लोकतः अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः इति एकवाक्य

=> अत्र 'शब्दप्रयोगे' इत्युक्तं तस्मात् प्रयोगादेव धर्मः न तु ज्ञानमात्रेण ।

धर्मनियमः अत्र त्रिधा समासः -

Scanned by CamScanner

① "धर्मायनियमः - धर्मनियमः" - चतुर्थीसमासः सर्वदाऽपि प्रकृतिविकृति-भावे सत्येव भवति यथा यूपाय दारुः - यूपदारुः तस्मादत्र सम्बन्धसामान्ये षष्ठीविधाय समासः कर्तव्यः।

② "धर्मार्थं नियमः - धर्मनियमः" -
अत्र " शाकपार्थिवादीनामुत्तरपदलोपश्च (वा० - २-१-६१) इति वार्तिकेन 'अर्थ' इति उत्तरपदलोपयुक्तः कर्मधारयसमासः।

③ " धर्मप्रयोजनो वा नियमः - धर्मनियमः " -
प्रयोजन शब्दः करणार्थे = प्रयोजकः इत्यर्थः।
लिङादिविषयेण नियोगाख्येन - नियोजति स्वास्मिन् पुरुषमिति नियोग तदाख्यं नियोगाख्यं धर्मः।

॥*॥ यथा लौकिकवैदिकेषु ॥*॥

प्रियतद्धिता दाक्षिणात्याः ................ गम्येयमगम्येति॥
* " दयितसुब्वृत्तयो विदर्भाः, वल्लभसमासवृत्तयो गौडाः,।
प्रियतद्धिता दाक्षिणात्याः, कृत प्रयोगरुचय उदीच्याः॥" *

आचार्य वररुचिः दाक्षिणात्यः तस्मात् लोके - वेदे इति प्रयोगस्थाने लौकिक - वैदिक इति तद्धितान्तं प्रयोगः करोति।
लोके वेदे - भवाः अवयवाः लोकवेद शब्दाभ्यामभिधातुं शक्यन्ते।
अथवा कृतान्तेषु (सिद्धान्तेषु) युज्यते इव तद्धितप्रयोगः।
लौकिकः = स्मृत्युपानिबद्धः, वैदिकः - श्रुत्युपानिबद्धः।
यथा लोके क्षुदानिवारणार्थं यः कोऽपि प्राणिभक्षयितुं शक्यः परन्तु स्मृत्या नियमः क्रियते यत् - " अभक्ष्यो ग्रामकुक्कुटः," " अभक्ष्यो ग्रामसूकरः" इत्यादीनां इदम् भक्ष्यमिदमभक्ष्यमिति।
⇒ खेदात्स्त्रीषु प्रवृत्तिः भवतिः तत्र गम्यायामगम्यायाञ्च विगमः समानः इव, तत्र शास्त्र नियमयति इयं गम्या इयमगम्या इति।
(वैश्यादि)

प्रदीपः - ७ः

Scanned by CamScanner

वेदे खल्वपि - पयोव्रतो ब्राह्मणो - - - - - भवतीति ॥

① यागे ब्राह्मणेन पयोव्रतम् आचरणीयम्, व्रतं नाम अभ्यवहारार्थः। अत्र शालीमांसादीनाम् अपि व्रतं कर्तुं शक्यं परन्तु वेदः नियमयति यत् ब्राह्मणः - पयोव्रतः इव भवेत् क्षत्रियः ; यवागूव्रतः तथा वैश्यः आमिक्षाव्रतः इव भवेत्।

② यागे पशुबन्धनार्थं यत्किञ्चित् काष्ठविशेषं अच्छ्रित्यानुच्छ्रित्य वा शक्यं पशुबन्धनम् परन्तु तत्र वेदः नियमयति यत् "बैल्व खादिरो वा यूपः स्यात्" इति।

③ "अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते - भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम्" (शु०-यजु०-१।१८)
अत्र अग्नि विनाऽपि मन्त्रं कपालान् सन्तापयति। अतः तत्र नियमः क्रियते मन्त्रपुरस्सरमेव कपालान् तप्येत इति मन्त्रपुरस्सरं क्रियमाणमभ्युदयकारी भवतीति ॥

=> पयः इव व्रतयति इति नियमः न तु विधीः ॥

एवमिहापि - समानायाम् - - - - - - - - भवतीति ॥
अत्र पक्षत्रयम् आस्ति -
① असाधुशब्दाः न वाचकाः परन्तु ते साधुशब्दान् स्मारयन्ति येन अर्थबोधो जायते।
② रूढ्या इव अपशब्दाः आगताः तस्मात् ते अपशब्दाः साक्षादेव अर्थं बोधयन्ति, न तु साधुशब्द-स्मारणपुरस्सरंम् अर्थं बोधयन्ति।
③ साधुशब्दवद् - अपभ्रंशाः अपि साक्षात् वाचकाः भवन्ति तस्मात् शब्देन अपशब्देन च धर्मनियमः क्रियते तत्र शब्देनैव अर्थः अभिधेयः अभ्युदयार्थम्। न तु अपशब्देन।

Scanned by CamScanner

||*|| अस्त्यप्रयुक्तः ||*||

सन्ति वै शब्दा ------------- नाऽमी साधवः स्युः।

ये शब्दाः प्रयुक्ताः ते साधवः इति वदति चेत् अप्रयुक्ताः अपि केचन शब्दाः सन्ति यथा - ① ऊषु (वस-निवासे, लिट्, म.पु.ब.), ② तेर - (तॄ-प्लवनसन्तरणयोः, लिट्, म.पु.ब.) ③ चक्र - (डुकृञ्-करणे), ④ पेच - (डुपचष्-पाके, लिट्, म.पु.ब.)

इदं तावद्विप्रतिषिद्धम् ------------- साधुः स्यात्?

घटं विनापि अर्थक्रियाकारित्वं यथा अवगम्यते तथा शब्दानां विषये वक्तुं न शक्यते, शब्दाः व्यवहाराय प्रयुज्यमानाः सन्तः एव सत्त्वेनावसीयन्ते। तदर्थमाह - इदं तावद्विप्रतिषिद्धम् (विरोधाभासः) यत् "सन्ति वै शब्दा अप्रयुक्ता" इति। 'यदि सन्ति तर्हि न अप्रयुक्ता' (अवश्यं प्रयुक्ताः एव भवेयुः) 'अथ अप्रयुक्ताः न सन्ति"। ~~सन्तोऽपि~~ सन्ति अपि अप्रयुक्ताः अपि इति तु परस्परं विप्रतिषिद्धमेव।

पुनश्च उपहासार्थं वदति यत् - भवानेव आह खलु - 'सन्ति शब्दाः अप्रयुक्ताश्च' इमां शब्दानां प्रयोगे भवदपेक्षया, अन्यः ~~कोवा~~ को वा साधुः स्यात्?

"नैतद्विप्रतिषिद्धम् ------------------ लोकेऽप्रयुक्ता इति।।

न इदं विप्रतिषिद्धं, यदेतद् शास्त्रविदः शास्त्रेण अनुविधीयन्ते तस्मात् सन्ति इति ब्रूमः, लोके अप्रयुक्ताः तस्मात् अप्रयुक्ताः इति ब्रूमः।

पुनश्च भवदपेक्षया अन्यः को वा शब्दानां प्रयोगे साधुः स्यात् इति यदुक्तं, तदर्थं अस्माभिः अप्रयुक्तः इति न वदामः अपितु लोकेऽप्रयुक्तः इत्याशयः।

Scanned by CamScanner

ननु च भवानप्यभ्यन्तरो - - - - - - - - - - - - न त्वहं लोकः।
यद्यपि अहमपि लोकेऽन्तर्भवामि तथाऽपि अहमेव न लोकः।
अर्थावगमाय लोकः शब्दान् प्रयुङ्क्ते न, एवं मया एतेऽर्थे प्रयुक्तः अपितु स्वरूपपदार्थका इत्यर्थः।

॥*॥ अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात् ॥*॥

अस्त्यप्रयुक्त इति चेत् - - - - - - - - - - - - - - प्रयुज्यन्ते ॥
शब्दानां सद्भावे अर्थमेव प्रमाणम्। तस्मात् अर्थानाम् सद्भावे एव शब्दाः प्रयुज्यन्ते। तस्मात् अस्त्यप्रयुक्तः शब्दः इति न वक्तव्यम्।

॥*॥ अप्रयोगः प्रयोगान्यत्वात् ॥*॥

अप्रयोगः खल्वपि - - - - - - - - - - - - - - पक्ववन्तः इति॥
अथवा प्रयोगान्यत्वात् अप्रयुक्तः इति शक्तं वक्तुम्, यथा ऊष इत्यस्य स्थाने उषिता, तेर इत्यस्य तीर्णाः, चक्रे इत्यस्य कृतवन्तः, पेचे इत्यस्य पक्ववन्तः इति प्रयोगान्तरं लोके दृश्यते। तस्मात् वाचकान्तरस्य तस्मिन् एवऽर्थे प्रयोगात् एते शब्दाः अप्रयुक्ताः इति उच्यते।
यद्यपि पक्ववन्तः इत्यादिभिः शब्दैः परोक्षादि अर्थं प्रत्याययितुं न शक्यं तथाऽपि पदान्तरसहिताः प्रयुज्यन्ते।

॥*॥ अप्रयुक्ते दीर्घसत्रवत् ॥*॥

यद्यप्यप्रयुक्ताः - - - - - - - - - - - - - - अनुविदधते ॥
सम्प्रति अप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वात् प्रयुक्तत्वात् अनुशासनम् कर्तव्यम्, इत्यतः आह - यथा पूर्वं दीर्घसत्राणि वार्षशतिकानि, वार्षसहस्रिकाणि (यागविशेषाः) भवन्ति स्म परन्तु

अद्यत्वे कोऽपि नेमान् तान् मानुष्मात मानुतिष्ठति, ऋषिसम्प्रदायः वर्तते तस्मात् याज्ञिकाः तान् शास्त्रेण अनुविदधते।
एवमेव दीर्घसत्रवत् शब्दाः अपि लक्षणेन (शास्त्रेण) अनुविधेयाः इत्यर्थः॥

## ॥*॥ सर्वे देशान्तरे ॥*॥

सर्वे खल्वप्येते - - - - - - - - - - - - - साहसमात्रमेव॥
एते सर्वेऽपि शब्दाः देशान्तरेषु प्रयुज्यन्ते। यदि प्रयुज्यन्ते तर्हि कुतः नोपलभ्यन्ते? उपलब्धौ यत्नः क्रियताम् - शब्दप्रयोगविषयः महान् वर्तते - 7 द्वीपावसुमती, 3 लोकाः, 4 वेदाः, 6 - वेदाङ्गानि, 100 अध्वर्युशाखाः, 1000 वर्त्मा सामवेदः, 21 बाह्वृच्यं, 9 अर्थवणो वेदो, वाकोवाक्यम् (शब्देन उक्ति प्रत्युक्तिरूपो ग्रन्थः), पुराणम् (वंशाद्यनुकीर्तनम्), सुश्रुत,
चरकादि - वैद्यकम् (~~आयुर्वेदम्~~), एतावान् शब्दप्रयोगविषयः, इदं सर्वं अदृष्ट्वा यदि कश्चन वदति यत् "सन्त्यप्रयुक्ताः" इति तत्तु साहसमात्रमेव॥

एतस्मिंश्चातिमहति - - - - - - - - - - यात्रमुदीच्येषु॥
एवं महति शब्दप्रयोगविषये ते ते शब्दाः देशान्तरेषु तत्र तत्र नियतविषयाः दृश्यन्ते।
यथा शव इति शब्दः - कम्बोजेषु - गत्यर्थे भाषितो भवति
आर्येषु - विकारार्थे।
~~हम्मति इति धातुं सौराष्ट्रे~~, रंहति सौराष्ट्रे हम्मतिः इति प्रयोगः तस्मिन्नेवार्थे प्राच्यमध्येषु रंहतिः इति प्रयोगः। लवनार्थे (छेदनार्थे) दातिः इति प्राच्याः, दात्रम् इति उदीच्याः वदन्ति।

ये चाप्येते भवतोऽप्रयुक्ता _ _ _ _ _ _ _ _ _ तनूनाम ॥

इमे शब्दाः (तेरे, चक्रे, ऊषा इति) ये अप्रयुक्ताः इति भवदभिमताः तेषामपि प्रयोगः वेदे दृश्यते।

उदा०

① 'सप्तास्ये रेवतीरेवदूष'। ② 'यद्दो रेवती रेवत्यां तमूष'। ③ 'यन्मे नरः श्रुत्यं ब्रह्म चक्र'। 'यत्रा नश्चका जरसं तनूनाम ॥ इति।

किं पुनः - शब्दस्य ज्ञाने धर्मः, आहोस्वित्प्रयोगे ? ॥

कश्चात्र विशेषः ? ॥

॥*॥ ज्ञाने धर्म इति चेत्तथाऽधर्मः ॥*॥

'ज्ञाने धर्म' _ _ _ _ _ _ _ _ _ अधर्मः ॥

यदि ज्ञाने सत्येव धर्मः तर्हि यथा साधुशब्दान् जानाति तद्वदेव असाधून् शब्दानपि जानीयात् तस्मात् यथा साधुशब्द ज्ञानेन धर्मोपजायते तद्वदेव असाधुशब्दज्ञानेन अधर्मोऽपि जायेत।

अथवा भूयानधर्मः _ _ _ _ _ _ _ _ _ ऽपभ्रंशाः ॥

लोके तु साधुशब्दापेक्षया तेषामपभ्रंशाः एव आधिकाः सान्ति यथा गौः इत्यस्य गावीगोणीगोतागोपोतलिका इत्येवमादयः अपभ्रंशा। तस्मात् अपशब्दानां बहुत्वात् अधर्मः एव आधिकः जायेत।

॥*॥ आचारे नियमः ॥*॥

आचारे पुनर्ऋषिर्नियमं _ _ _ _ _ _ _ पराबभूवुः इति॥

आचारे (प्रयोगे) पुनः ऋषिः (वेदः) नियमं वेदयते - 'तेऽसुरा हेलयो हेलयो इति कुर्वन्तः पराबभूवुः इति ॥

अस्तु तर्हि प्रयोगे ॥ (धर्मः इत्यर्थः)

Scanned by CamScanner

## ॥*॥ प्रयोगे सर्वलोकस्य ॥*॥

यदि प्रयोगे धर्मः - - - - - - - - - - - - फलादव्यतिरेच्यः॥
अस्तु ज्ञानेन धर्मः न अपितु प्रयत्नेन धर्मः। इति यदि उच्येत तर्हि लोके सर्वेऽपि अभ्युदयं (मोक्षं) प्राप्नुयुः। फलवता नाम प्रयत्नेन भवितव्यम्। यदि प्रयत्नेन विना फलं स्यात् प्रयत्नस्य वैयर्थ्यमापद्येत। न च प्रयत्नः फलादव्यतिरेच्यः = यत्र यत्र प्रयत्नं तत्र तत्र फलम्। फलाभावे प्रयत्नाभावः इत्यर्थः॥

ननु च ये कृतप्रयत्नाः - - - - - - - - - - - - - ~~योक्ष्यन्ते~~ स्यात्॥
ननु ये प्रयत्नं कुर्वन्ति ते एव साधीयः शब्दान् प्रयोक्ष्यन्ते तथा ते एव अभ्युदयं प्राप्नुयुः। परन्तु लोके व्यतिरेकोऽपि दृश्यते यथा कृतप्रयत्नाः अपि अप्रवीणाः भवन्ति अकृतप्रयत्नाः अपि प्रवीणाः भवन्ती'ति। तस्मात् फलव्यतिरेकोऽपि स्यात्, (इत्युक्ते शब्दप्रयोगमात्रेणैव अभ्युदय प्राप्तिरपि स्यात्।)
एवं तर्हि नापि ज्ञान एव ~~प्र~~ धर्मो नापि प्रयोग एव ॥ किं तर्हि ?॥

## ॥*॥ शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥*॥

शास्त्रपूर्वकं यः - - - - - - - - - - - - - - - - एवं वेद॥
शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सः अभ्युदयं प्राप्नोति। सः शब्दः वेदशब्देन तुल्यः भवति। वेदशब्दः = वेदः शब्दो यस्यार्थस्य स वेदशब्द (प्रमाणमित्यर्थः)॥
यथा "योऽग्निष्टोमेन यजते य उ चैनमेवं वेद"
इत्युक्ते यः अग्निष्टोमेन यजते यश्च अग्निष्टोमं (मन्त्रान्) जानाति सः स्वर्गं प्राप्नोति।
एवं यथा ज्ञात्वाऽनुष्ठानं तथा शब्दानांमपि प्रकृत्यादिविभागज्ञान पूर्वकः प्रयोगः एव अभ्युदयकारी भवति इत्यर्थः।

Scanned by CamScanner

अपर आह ---------------- युज्यते इति ।
अथवा वेदशब्दः इत्यत्र कर्मधारयसमासः कुर्मः वेदश्चासौ शब्दश्च = वेदशब्दः।
यथा वेदशब्दाः नियमपूर्वकमधीताः फलवन्तः भवन्ति एवमेव शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सः अभ्युदयं प्राप्नोति ॥

ननु चोक्तं – 'ज्ञाने धर्मः इति चेत्तथाऽधर्म' इति ॥
नैष दोषः ---------------- नाभ्युदयाय ॥
वयं वैय्याकरणाः शब्दप्रमाणकाः। शब्देन (वेदेन / शास्त्रेण) यदुच्यते तदेव अस्माकं प्रमाणम्। शब्दस्तु शब्देन धर्ममाह, न तु अपशब्देन अधर्मम्। तस्मात् यथा हिक्कितं, हसितं, कण्डूयितं नैव दोषाय भवन्ति न वा अभ्युदयाय एवमेव अपशब्दाः अपि दोषायऽपि न भवन्ति अभ्युदयाय अपि न भवन्ति इत्यर्थः॥

॥*॥ अभ्युपायो वा अपशब्दज्ञानं शब्दज्ञाने ॥*॥
अथवा अभ्युपायो ---------------- शब्दज्ञाने धर्मः' इति॥
अथवा शब्दज्ञाने अपशब्दज्ञानं अभ्युपायः (उपयोगी / सहकारी) एव। तस्मात् 'ज्ञाने धर्मः' इति वाक्यस्य अर्थापत्या एवं अर्थः क्रियते यत् 'अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः॥ इति ॥
अपशब्दज्ञानं विना (नान्तरीयकत्वात्) शब्दस्य ज्ञानं न भवति तस्मात् शब्दज्ञानात् पृथक् फलं अपशब्दज्ञानस्य नास्तीत्यर्थः।

॥*॥ कूपखानकवद्वा ॥*॥
अथवा कूपखानकवद् ---------------- योगो भविष्यति॥
यथा कूपखानकः कूपखननवेलायां मृदा-पांसुभिश्च लिप्तः भवति पुन ~~जलेन~~ आधिकस्यनेन सञ्जातेन जलेन शुद्ध्यति तस्यैव कूपस्य

भवति। एवमेव यद्यपि अपशब्दज्ञानेन अधर्मः भवति तथाऽपि शब्दज्ञाने सति यः धर्मः उपजायते तेन सः अधर्मः निवारितो (नाशितो) भवति। तथा सैव धर्मः अभ्युदयाय युज्यते।

=) ~~साधुशब्द~~प्रयोगे उत्पन्नः उत्कृष्टधर्मः असाधुशब्दप्रयोगे उत्पन्नः अधर्मोऽपि, अनुत्पन्नकल्पो भवति (ईषदसमाप्तौकल्पब्देश्य देशीयरः) ॥)

॥*॥ आचारे नियम इति चेद्याज्ञे कर्मणि
स नियमोऽन्यत्राऽनियमः ॥ * ॥

"यद्प्युच्यते - आचारे ------------- पराभूता ॥

"आचारे नियमः" = प्रयोगे नियमः अपेक्षितः, पूर्वमुक्त तदर्थमुच्यते सः नियमः याज्ञे कर्मणि मात्र नान्यत्र ।)

यथा यर्वाणस्तर्वाणः नामकाः ऋषयः - प्रत्यक्षधर्माणः = (योगजप्रत्यक्षेण सर्वं विदितवन्तः), विद्याविद्याप्रविभागज्ञाः, अधिगत याथातथ्याः' ते व्यवहारकाले यद्वानस्तद्वान इति प्रयोगे यर्वाणस्तर्वाण इति प्रयोगं चक्रुः परन्तु याज्ञे कर्मणि तु नापभाषन्ते ' ~~यर्वाणस्त~~ इत्युक्ते यद्वानस्तद्वानः इत्येव वदन्ति स्म।

परन्तु असुरास्तु याज्ञेकर्मण्येव अपभाषितवन्तः तस्मात पराबभूवुः।

तस्मात याज्ञेकर्माणि मात्र आचारनियमः नान्यत्र ॥

Scanned by CamScanner

शब्दः - लक्ष्यः , सूत्रम - लक्षणम ।

[व्याकरणपदार्थनिरूपणे आक्षेपभाष्यम]

अथ 'व्याकरणम' इत्यस्य शब्दस्य कः पदार्थः ? सूत्रम ।
'न चान्तरेण व्याकरणम' इत्यादि ..

सूत्रपक्षे तथा शब्दपक्षे उभयत्रापि दोष दर्शनार्थमयं प्रश्नः
यत व्याकरणम इत्यस्य पदार्थः कः इति ?
तस्य समाधानार्थम् अत्र उच्यते सूत्रं व्याकरणमिति ।

[सूत्रे व्याकरणे आक्षेपवार्तिकम]

॥*। सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ॥*॥
सूत्रे ( सूत्रार्थे सति ) व्याकरणे ( शब्दे ) षष्ठ्यर्थो नोपपद्यते - 'व्याकरणस्य सूत्रम' इति ॥ किं हि तदन्यत्सूत्रात व्याकरणम यस्यादः सूत्रं स्यात ?

⇒ सूत्रे व्याकरणे प्रथमदोषः —

यदि सूत्रमेव व्याकरणम तर्हि अवयवावयवी सम्बन्धबोधक षष्ठ्यर्थो नोपपद्येत् । लोके - 'व्याकरणस्य सूत्रम' इति व्यवहारः दृश्यते। यदि व्याकरणम इत्यस्य पदार्थः सूत्रम इति स्यात तर्हि 'सूत्रस्य सूत्रम' इत्यर्थोपलभ्येत ।

प्रदीपः - यदि व्याकरण तथा सूत्रम इभ्यामपि शब्दाभ्यां 'अष्टाध्यायीः प्रतिपादनं क्रियते तर्हि षष्ठ्यर्थो नोपपद्यते इति दोषः स्यात
'व्यतिरेकाभावात = उभयोः समानार्थकत्वात "
सामान्यविशेष- भावेन तु षष्ठ्यर्थो उपलभ्यते एव 'अष्टाध्याय्याः = व्याकरणस्य एकदेशं सूत्रम इति शब्देन उच्यते तस्मात षष्ठ्यर्थो उपपद्यते एव ।

॥ * ॥ शब्दाऽप्रतिपत्तिः ॥*॥
शब्दानां चाऽप्रतिपत्तिः प्राप्नोति, व्याकरणाच्छब्दान्प्रतिपद्यामहे' इति नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते ॥
किं तर्हि ॥ व्याख्यानतश्च ॥

⇒ सूत्रे व्याकरणे द्वितीयदोषः -

लोके व्याकरणात शब्दज्ञानम इति श्रूयते

Scanned by CamScanner

यदि व्याकरणम् इत्युक्ते सूत्रम् इति प्रतिपद्यामहे तर्हि शब्दानां ज्ञानं न स्यात्, केवलेन सूत्रेण शब्दानाम् ज्ञानं न भवति सूत्रेण व्याख्यानतश्च (अत्र चकारः समुच्चयार्थकः) शब्दानां ज्ञानं भवति इत्यर्थः॥

[दोष-निरासभाष्यम्]

सिद्धा० - ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति॥

तदेव सूत्रं विगृह्य (पृथक् - पृथक्) लिख्यते चेत् व्याख्यानं भवति।

[दोषस्थापनभाष्यम्]

न केवलानि चर्चापदानि व्याख्यानं - 'वृद्धिः आत्, ऐच्' इति॥ किं तर्हि? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति॥

⇒ 'समुदितरूपेण पठितानां पदानां पृथक् पृथक् कृत्वा प्रयोगकरणमेव चर्चापाठः इत्युच्यते। पदपाठः = चर्चापाठः॥

'प्रगृह्य चर्चायामितिना (कात्या० प्राति० ४।१८)

⇒ केवलं विगृहीतानि पदानि व्याख्यानतया अभिधातुं न शक्यन्ते।

⇒ अपितु उदाहरणंप्रत्युदाहरणंवाक्याध्याहारः इत्येतत् समुदितं एव व्याख्यानं भवति। ~~समुदायस्य~~

तस्मात् सूत्रं न व्याकरणम् इति पूर्वपक्षः।

[एकदेशिनः पक्षान्तराश्रयणभाष्यम्]

एवं तर्हि शब्दः -

एवं तर्हि व्याकरणम् इत्यस्य पदार्थः शब्दः इति। (लक्ष्यम् - व्याकरणम्)

|*|| शब्दे ल्युडर्थः ||*||

यदि शब्दो व्याकरणं, ल्युडर्थो नोपपद्यते - 'व्याक्रियन्ते शब्दाः अनेन' इति व्याकरणम्। नहि शब्देन किञ्चित्व्याक्रियते। केन तर्हि सूत्रेण॥

कृ + ल्युट् प्रत्यये - व्याकरणम् इति रूपम्। यदि शब्दः व्याकरणम् तर्हि ल्युटः करणार्थो ~~[illegible]~~ न सङ्गच्छते।

Page No ______
Date ______

व्याक्रियन्ते (प्रकृति प्रत्यय रूपेण विभज्यन्ते) शब्दाः अनेन इति व्याकरणम्। शब्देन तु विभागः भवितुं नार्हति (तस्मात्) (सूत्रमेव व्याकरणम्) केन तर्हि व्याक्रियन्ते शब्दाः - सूत्रेण।

पुनश्च 'व्याक्रियन्ते अनेन शब्दाः' इत्यत्र शब्दस्य व्याक्रियमाणत्वात् कर्मत्वं ~~भवति~~ आप्नोति न तु करणत्वम्।

॥*॥ भवे च तद्धितः ॥*॥

भवे च तद्धितो नोपपद्यते - व्याकरणे भवो योगो वैयाकरणः' इति। नहि शब्दे भवो योगः॥ क्व तर्हि॥ सूत्रे॥

व्याकरणे भवः - वैयाकरणः इति तत्रभवः इति सूत्रेण भवार्थे अण् प्रत्ययः। यदि शब्दः = व्याकरणम् तर्हि भवार्थे तद्धित प्रत्ययः नोपपद्येत।

व्याकरणे विद्यमानः योगः सूत्रे भवति न तु शब्देषु। योगः नाम शब्दसंस्कारः।

यदि शब्दे अपि अन्वाख्यायकत्वेन = भवः योगः स्यात् (तर्हि मीमांसादियोगस्यापि शब्दं प्रति विचारकत्वाद्वैयाकरणत्व प्रसङ्गः) (?)

॥*॥ प्रोक्तादयश्च तद्धिताः॥

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते, ~~पाणिनीना~~ पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलं, काशकृत्स्नमिति। नहि पाणिनीना शब्दाः प्रोक्ताः, किं तर्हि सूत्रम्॥

पुनश्च शब्दे व्याकरणे उक्ते - प्रोक्तार्थे पाणिनिना प्रोक्तं - पाणिनीयम् इति प्रोक्तार्थे यः छः प्रत्ययः विहितः सोऽपि न स्यात्। यतो हि पाणिनिना शब्दाः न प्रोक्ताः अपि तु सूत्रं प्रोक्तम् तस्मात् पाणिनीयम् = सूत्रम् न तु शब्दाः।

Scanned by CamScanner

(अभिहिताभिधानदोषसूचकभाष्यम्)

किमर्थमिदमुच्यते - भवे [च तद्धित.] 'प्रोक्तादयश्च तद्धिताः'
इत्येव भवेऽपि तद्धितश्चोदितः स्यात।
भवे, प्रोक्तादयश्च तद्धिताः इति द्वयोः कथनं कुतः प्रोक्तादयश्च
तद्धिताः इति कथनेन भवार्थोऽपि अन्तर्भवति।

पुरस्तादिदमाचार्येण दृष्टं - भवे च तद्धितः' इति, तत्पठितम्।
तत उत्तरकालमिदं दृष्टम् - प्रोक्तादयश्च तद्धिताः इति तदपि
पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति।
आदौ आचार्य वररुचिना भवार्थे तद्धितः दृष्टः तस्मात् तत्पठितं
तदुत्तरं प्रोक्तार्थे दृष्टं अतः तत्पठितं तस्मात् ~~...~~ पुनः परिमार्ष्टुं
न शक्यते। मूलसूत्रवत् वार्तिकान्यपि

(ii)

(प्रथमाक्षेपनिराकरणभाष्यम्)

~~प्रथमाक्षेपनिरासक~~ अयं तावद्दोषः - यदुच्यते 'शब्दे ल्युडर्थः'
इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते। किं तर्हि?॥
अन्येष्वपि कारकेषु - 'कृत्यल्युटो बहुलमिति', तद्यथा
प्रस्कन्दनं प्रपतनमिति।

→ शब्दः ~~सूत्रं~~ व्याकरणं इत्यस्मिन् पक्षे प्रथमदोषस्य परिहारः -
केवलं करणाधिकरणयोरेव ल्युड्विधानं स्यात् इति न कोऽपि
नियमः 'बहुल' ग्रहणात् अन्यकारकेष्वपि ल्युड्विधानं शक्यम्
तस्मात् व्याक्रियते यत् तद् - व्याकरणम् (कर्मणि ल्युट्)
शब्दः व्याक्रियते तस्मात् शब्द = व्याकरणम् सम्पद्यते।

→ प्रस्कन्दनं, प्रपतनम् = इति भीमादिगणे पठितत्वात् अपादानार्थे
ल्युट्। भीमादयोऽपादाने।

=> करणार्थेऽपि ल्युडर्थः सङ्गच्छते।

अथवा शब्दैरपि शब्दा व्याक्रियन्ते। तद्यथा 'गौ रित्युक्ते सर्वे सन्देहा निवर्तन्ते 'नाश्वो न गर्दभः इति।

शब्दैरपि शब्दाः व्याक्रियन्ते ~~शब्दः~~ (विभज्यन्ते) गौः इत्युक्ते सति न ~~अ~~ अश्वः न गर्दभः इति सन्देहः अपगच्छति वाचकान्तराणां निवृत्तिः भवति।

अयं तर्हि दोषः – भवे (च तद्धितः) 'प्रोक्तादयश्च तद्धिताः' इति॥ एवं तर्हि –

॥*॥ लक्ष्य-लक्षणे व्याकरणम् ॥*॥

लक्ष्यम् - शब्दः, लक्षणम् - सूत्रम् तदुभयं समुदितं व्याकरणम् इत्यर्थः।

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणम् भवतीति॥ किं पुनर्लक्ष्यं, किं लक्षणम्?, शब्दो लक्ष्यः, सूत्रं लक्षणम्॥

* एवमप्ययं दोषः – समुदाये व्याकरणशब्द प्रवृत्तोऽवयवे नोपपद्यते॥ सूत्राणि चाप्यधीयान इष्यते – 'वैयाकरण' इति।

यदि समुदायः (समुदितं) व्याकरणम् तर्हि समुदायस्य अवयवेषु व्याकरणमिति प्रयोगः न स्यात्। परन्तु यः केवलं सूत्रं अधीते तस्मिन् अपि इष्यते वैयाकरणः इति प्रयोगः।

नैष दोषः। समुदायेषु हि शब्दाः प्रवृत्ताः अवयवेष्वपि वर्तन्ते। तद्यथा 'पूर्वे पञ्चालाः, उत्तरे पञ्चालाः' तैलं भुक्तं, घृतं भुक्तं, शुक्लः, नीलः, कपिलः, कृष्णः इति। एवं अयं समुदाये प्रवृत्तोऽपि व्याकरणशब्दः प्रवृत्तोऽवयवेषु अपि वर्तते।

=> अयं न दोषः यथा ~~जनपदे प्रयुक्त~~ ~~प्रदे~~ जनपदान्तरनिवृत्ति विवक्षायां ~~द~~ प्रदेशैकदेशे-ऽपि समुदायारोपः।

Scanned by CamScanner

अथ वा पुनरस्तु सूत्रं॥ (व्याकरणम्) ....
नन्‍ु .... भाविष्यति ॥
अथवा सूत्र एव व्याकरणमस्तु इति, एवं उक्ते सति षष्ठ्यर्थो नोपपद्यते इति पूर्वमुक्तं खलु ?
नैष दोषः व्यपदेशिवद्भावेन भवितुमर्हति।
यथा राहोः शिरः, तथा एकस्मिन्नेव पुत्रे अयं मे ज्येष्ठः पुत्रः इत्यादि व्यवहारः तद्वदेव अत्रापि लक्ष्य-लक्षणयोः समुदायः व्याकरणशब्देन अभिधीयते। तत्रैव एकदेशी सूत्रम् तस्मिन् सूत्रभागे व्यपदेशिवद्भावेन व्याकरणम् इति व्यवहारः युज्यते एव।

~~यदप्युच्यते~~

यदप्युच्यते - "शब्दाप्रतिपत्तिरिति .......... व्याख्यानं भवति।
पूर्वं या आशंका कृता यत् यदि सूत्रमेव व्याकरणं तर्हि सूत्रात् शब्दप्रतिपत्तिः भवितुं नार्हति। सूत्रात् व्याख्यानतश्च शब्दप्रतिपत्तिः पुनश्च चर्चापदानि एव व्याख्यानं न भवन्ति, उदाहरणं, प्रत्युदाहरणम्, वाक्याध्याहारः इत्येतद् समुदितं ~~व्याकरणं भ~~ व्याख्यानं भवति इति तस्य उत्तरमुच्यते -

अविजानत एतदेवं ............ कथयेन्नादो गृह्णीत।
एतादृशं व्याख्यानं मन्दमतीनां कृते अपेक्षितं। यथार्थतया तु सूत्रेणैव पदच्छेदादिभिः सूत्रार्थो वर्णयितुं शक्यः। यथा -
आतश्च -
यः सूत्रात् अर्थं ज्ञातुं न शक्नोति ~~स~~ तस्मै नादः मात्र गृह्यते।
न अदः :- इतोऽपि अग्रे न क्रियावे जायते / नादः - घोषमण गृह्यते
(न.द) अर्थस्तु नैव जायते)

अथ किमर्थो वर्णानामुपदेशः ?

* ( वर्णानां परिज्ञानार्थं लोकः तथा 'शिक्षा' इति वेदाङ्गं वर्तते तस्मात् जिज्ञासा भवति यत् पाणिनीना वर्णोपदेशः किमर्थं क्रियमाणमास्ति ? इति । )

=) लोकतः एव वर्णज्ञान संभवात् माहेश्वरस्य वर्णसमाम्नायः किमर्थं इत्यर्थः। नहि वर्णोपदेशेन कस्यचित् साधुशब्दस्य अनुशासनमिति आशयः।

२ प्रयोजनम् ) ॥*॥ वृत्तिसमवायार्थ उपदेशः ॥*॥

वृत्तिसमवायार्थो वर्णानामुपदेशः॥ ------ उपदिष्टा इमे वर्णाः॥

वृत्तिसमवायार्थो वर्णानामुपदेशः अत्र त्रिधा समासः उक्तः भाष्यकारैः। - (1) वृत्तये समवायः - वृत्तिसमवायः।

=) अत्रापि प्रकृतिविकृतिभावाभावात् यूपदारुः-वत् समासो न भवति। तस्मात् वृत्तेः समवायः - वृत्तिसमवायः इति षष्ठ्यर्थे चतुर्थी समासो बोद्धव्यः। (सम्बन्ध सामान्ये षष्ठी)

(2) वृत्यर्थो वा समवायः- वृत्तिसमवायः।
अत्र शाकपार्थिवादीनामुत्तरपदलोपश्च (२-१-६८ वा०) इति वार्तिकेन अर्थ इति उत्तरपदलोपेयुक्तः कर्मधारय समासः)

(3) वृत्ति-प्रयोजनो वा वृत्तिसमवायः। - अत्रापि प्रयोजन इत्यत्र करणार्थे ल्युट् प्रत्ययः अवगन्तव्यः तस्मात् प्रयोजनम् = प्रयोजकः इत्यर्थः।

=) शास्त्रप्रवृत्तिं प्रति प्रयोजको भवति - वर्णसमवायः।

वृत्तिः = शास्त्रप्रवृत्तिः। समवायः = वर्णानामानुपूर्व्येण सन्निवेशः। उपदेशः = उच्चारणम्।
शास्त्रप्रवृत्तिप्रत्यासन्नत्वं समवायस्य दर्शयति = शास्त्रप्रवृत्त्यर्थः वर्णानां आनुपूर्व्याः अत्यन्त उपकारकत्वं दर्शयितुं उदाहरणमाह -

Scanned by CamScanner

( दिश - अतिसर्जने (तु०)

Page No
Date

इग्यणः सम्प्रसारणम् इत्यत्र यदि वर्णानामानुपूर्व्याः ज्ञानं वर्तते तर्हि तावदेव यथासङ्ख्यं शास्त्रं योग्यरूपेण प्रवर्तेत।
वृत्ति प्रयोजनम् - शब्द साधुत्वासाधुत्व ज्ञानार्थं पारम्पर्येण समवायस्य अङ्गत्वम्।

?

दिश धातोः उच्चारणार्थत्वात् - उपदेशः इत्यस्य उच्चारणमित्यर्थः। यतो हि कश्चन उच्चार्य इमे वर्णा मे उपदिष्टाः इति वदति।

२. प्रयोजनम्) ~~अन~~

॥*॥ अनुबन्धकरणार्थश्च ॥*॥

अनुबन्धकरणार्थश्च ________________ वृत्यर्थः ॥

अनुबन्धकरणार्थश्च वर्णानामुपदेशः इति द्वितीयं प्रयोजनम्। वर्णाननुदिश्य अनुबन्धकरणमशक्यं तस्मात् वृत्तिसमवायार्थं तथा अनुबन्धकरणार्थं इति आभ्यां प्रयोजनाभ्यां वर्णानामुपदेशः क्रियते (प्रत्याहारः) क्रियते। (प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः अत्र) इति प्रत्याहारः। प्रत्याहारश्च वृत्यर्थः = (लाघवेन शास्त्र प्रवृत्यर्थः)

-) प्रत्याहारशब्देन अणादिसंज्ञाः उच्यन्ते।

३. प्रयोजनम्)

॥*॥ इष्टबुद्ध्यर्थश्च ॥*॥

~~इष्टवर्णान् बोद्धुं~~ इष्टबुद्ध्यर्थश्च ______ विज्ञातुम् ॥

इष्टवर्णान् बोधयितुमपि वर्णोपदेशः कृतः। विना वर्णानामुपदेशं इष्टवर्णाः विज्ञातुं नैव शक्याः। तस्मात् इष्टबुद्ध्यर्थं वर्णोपदेशः इति तृतीयं प्रयोजनम्।

दीपः

?

॥*॥ इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिक-
-दीर्घप्लुतानामुपदेशः ॥*॥

~~यदि~~ इष्टबुद्ध्यर्थ ........................ वर्णाः इष्यन्ते ॥

यदि इष्टबुद्ध्यर्थं वर्णानामुपदेशः तर्हि सर्वेषामपि स्वराणां उदात्तानुदात्तस्वरित सानुनासिक निरनुनासिक दीर्घ प्लुत सहिततया-ऽपि उच्चारणं ~~कस्यचित्~~ कर्तव्यमासीत यतो हि तेऽपि वर्णाः इष्टाः इव (प्रयोगे दृश्यन्ते) इत्यर्थः॥

॥*॥ आकृत्युपदेशात् सिद्धम ॥*॥

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति । तथेवर्णाकृतिः । तथोवर्णाकृतिः॥ अवर्णाकृतिः = अत्वम ॥

॥*॥ आकृत्युपदेशात्सिद्धमिति चेत -
संवृतादीनां प्रतिषेधः ॥*॥

" आकृत्युपदेशात ........................ व्यञ्जनदोषाः ॥

आकृत्युपदेशात सिद्धं चेत संवृतादि-दोषाणां विप्रतिषेधः वक्तव्यः॥ संवृतः, कलो, ध्मातः, एणीकृतः, अम्बूकृतः, ~~ह~~ अर्धकः, ग्रस्तः, निरस्तः, प्रगीत, उपगीत, क्ष्विण्ण, रोमश इति ।

ग्रस्तं निरस्तमवलम्बितं निर्हत,-
अम्बूकृतं ध्मातमथो विकम्पितम ॥
सन्दष्टमेणीकृतमर्धकं द्रुतं,
विकीर्णमेताः स्वरदोषभावनाः॥

1) संवृतम - कण्ठसंकोचनपुरस्सरमुच्चारणम ।
2) कलः - स्थानान्तरानिष्पन्न (काकालिकेन उच्चारणम)
3) ध्मातः - श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते।
4) एणीकृतः - अविशेषः । (अयमोकारो वा औकारो वा इति सन्देहः)

Scanned by CamScanner

5) अम्बूकृत: - यो व्यक्तोऽपि अन्तर्मुख इव श्रूयते ॥
" भल्लूकयूनाम् अनुरसितगुरूणि स्त्यानमम्बूकृतानि ।"
(उत्तररामचरितम् - २।२१)

6) अर्धक: - दीर्घोऽपि ह्रस्व इव ।

7) ग्रस्त: - जिह्वामूले निगृहीत: ।

8) निरस्त: - निष्ठुर: (कठोर-उच्चारणम्)

9) प्रगीत: - सामवदुच्चारित:

10) उपगीत: - समीपवर्णान्तरगीत्यानुरक्त: ।

11) ~~क्ष्व~~ क्ष्विण्ण: - कम्पमान: इव

12) रोमश: - गम्भीर:

13) अविलम्बित: - वर्णान्तराऽसंभिन्न: ।

14) निर्हतो - रूक्ष:

15) सन्दष्ट: - वर्द्धित इव (दन्तसंयोजन पुरस्सरमुच्चारणम्)

16) विकीर्ण: - वर्णान्तरे प्रसृत: ।

इति स्वरदोषगोत्राणि ।

नैष दोष: ।

॥ * ॥ गर्गादिबिदादिपाठात् संवृतादीनां निवृत्ति: ॥ * ॥

॥ * ॥ समुदायसाधुत्वार्थं तु गर्गादिबिदादिपाठ: ॥ * ॥

गर्गादिबिदादि - - - - - - - - - - - यथा स्यादिति ॥

गर्गादिबिदादिपाठस्य प्रयोजनद्वयम् - ① संवृतादीनां निवृत्ति: ।

प्रदीप: ② समुदायस्य साधुत्वसाधनम् ।

(?)! ~~यद्यपि~~ यद्यपि प्रत्ययविध्यर्थो गर्गादीनां पाठ: तथापि प्रसङ्गात् समुदाय- ~~स्य~~ स्य साधुत्वाद्योऽपि भवति ।

Scanned by CamScanner

Page No ______
Date ______

॥ प्रत्यापत्तिवचनम् ॥

एवं नर्ह्यष्टादश ________ वक्ष्यामि ।

तर्हि अष्टादशभेदरहितं तथा कलादिदोष रहितं अकारं (अकारस्य प्रत्यापत्तिं) वक्ष्यामि ।

=> अत्र अष्टाध्याय्याम् 'अ अ' इति सूत्रेण अकारस्य संवृतत्वेन प्रत्यापत्तिः कृता वर्तते तस्मात् संवृतादिषु संवृतादिदोष इत्यस्य स्थाने कलादिदोषरहितमित्युक्तम् ।

यथा अकारस्य कृतमेवमेव शास्त्रान्ते अन्यवर्णानामपि प्रत्यापत्तिं वक्ष्यामि इति भावः ।

॥*॥ लिङ्गार्था तु प्रतिपत्तिः ॥*॥

लिङ्गार्था सा तर्हि ________ करिष्यते ॥

लिङ्गम् = चिह्नम् (कलादिदोषाः) तेनैव प्रत्यापत्तिः कर्तुं शक्या ।

यदनुबन्धैः क्रियते तत्कलादिभिः करिष्यते येन अनेकमनुबन्ध-शतं नोच्चार्यं, इत्संज्ञा तथा लोपश्च न वक्तव्यः स्यात् लाघवञ्च स्यात् ।

यथा ① अनुदात्तङितात्मनेपदम्, स्थाने - कलादात्मनेपदम् ।

② आदिरन्त्येन सहेता, स्थाने आदि कलैः सह इति उक्त्वा अण् स्थाने अउ इति संज्ञा करिष्यामः पुनश्च अ तथा उ इत्यनयोः सन्धिः सन्देह मास्तु तदर्थं न कृता इति वक्ष्यामः ।

" सिद्ध्यत्येवमपाणिनीयं ________ भविष्यति इति ॥

एवं कृते सिद्ध्यति, लाघवञ्च भवति तथाऽपि अपाणिनीयम् इदम् । तस्मात् यथान्यासम् (तदाकृत्यनुसारम्) एव अस्तु ।

=> तर्हि पूर्वं वार्तिकमुक्तं ननु, - " आकृत्युपदेशात् सिद्धेत्संवृता-दीनां प्रतिषेधः' इति । संवृतादिदोषानां विशेषरूपेण प्रतिषेधः वक्तव्यः इति ।

=> संवृतादिदोषानां निवृत्तिस्तु गर्गादिप्रयोगात् एव भविष्यति इति ।

Scanned by CamScanner

Page No ______ Date ______

ननु चान्यद्गर्गा - - - - - - - - - - - - - - - - - - कलादयश्च निवर्तन्ते॥

ननु गर्गादि बिदादि-पाठस्य तु समुदायसाधुत्वं इति प्रयोजनान्तरं दर्शितं खलु पुन: कथं कलादीनां निवृत्ति:।

उच्यते - गर्गादिगणानां, समुदायसाधुत्वार्थं तथा कलादिनिवृत्यर्थं च पाठ:।

कथं पुनरेकेन यत्नेनोभयं लभ्यते ?॥

लभ्यमित्याह - - - - - - - - - - - - - - - - अलम्बुसानां यातेति॥

लोके एकेन हेतुना फलद्वयस्य प्राप्तिरपि दृष्टा वर्तते। यथा

(1) आम्राश्च सिक्ता: पितरश्च तृप्ता:।

(2) श्वेतो धावति - श्वा इत: धावति।

(3) अलम्बुसानां याता -

'केषां जनपदानां गन्ता', 'को वा समर्थ:' इति प्रश्नद्वयस्य उत्तरम् = अलम्बुसा - देशविशेष:। बुसानां-पलालवर्णानां, याता - प्राप्तिमान्, अलं - समर्थ: इत्यर्थ:।

अथ वा इदं - - - - - - - - - - - - - - - प्राप्ता: कलादय:॥

अथवा अयं (प्रष्टा) एव प्रष्टव्य: यत एते संवृतादि दोषा: कुत्र श्रूयन्ते इति यतो हि आगमा:, विकार: (अष्टविकृति पाठ: जटादय:), प्रत्यया:, धातव:, प्रातिपदिकानि, एते सर्वेऽपि शुद्धा: एव पठिता:। पुन: कुत्र दोषा: श्रूयन्ते।

अस्तु नहि यानि अग्रहणानि प्रातिपदिकानि (यानि न पठितानि) तेषां स्वरवर्णानामानुपूर्वी ज्ञानार्थं संवृतादिदोषानां पाठ: कर्तव्य: उपदेश: कर्तव्य:। 'शश' 'षष', 'पलाश' 'पलाष', तथा मञ्चको मञ्जक: इति मा भूत तदर्थं उपदेश: कर्तव्य:।

=) धात्वादीनां शुद्धपागत तत्स्थवर्णानाञ्च न कश्चिद्दोष:।

=) पुनश्च डित्थत्वादीनां संज्ञानां 'शिष्टप्रयुक्तत्वात्' तथा उणादि उणादीनां तथा पृषोदरादीनां च साधुत्वमत्र सङ्गृहीतमेव।

॥ इति प्रथममाह्निकम् ॥

Scanned by CamScanner